षोडशग्रंथ.

व्रजभाषान्तरसहित ।

गोस्वामिभूषण

श्री १०८ श्रीगोकुलनाथमहाराजकी

आज्ञानुसार-अनुवादक और प्रकाशक

देवर्षिभट्टश्रीद्वारकानाथात्मज

भट्टरमानाथशर्मा

मुद्रालय निर्णयसागर.

सन १९१४.

प्रस्तावना.

वाग्देवतावतार श्रीमद्वल्लभाचार्यने वेद गीता और श्रीमद्भागवत आदि भगवच्छास्त्रनके विस्तृतसिद्धान्तनको संक्षेप करके यह पद्यरूप 'प्रकरण-ग्रन्थ' बनाये हैं। इनको 'षोडशग्रन्थ' यह नाम कबसूं प्रचलितभयो सो अभीतक निश्चय नहीं होय है। कदाचित् इनके प्रतिपाद्यविषय हर-एक वैष्णवकूं प्रतिदिन याद राखवे लायक हैं और वे सोलह मुख्य हैं यों उनको के चल्यो होय ऐसो अनुमान मात्र होय है. अस्तु तथापि ये ग्रन्थ अमूल्यरत्न हैं यामें तो कोई तरहको सन्देह नहीं है।

या ग्रंथपै अनेक आचार्यनने कितनीक संस्कृतमें टीकाऐं लिखीं हैं. जिनके देखवेसूं प्राय: बहोतसो संप्रदायको रहस्य मालुम होय जाय है. भाषानेंभी याकी कितनीही टीका होय चुकी हैं. परन्तु तिनमें कितनीक टीका व्रजभाषाकी च्युतिसूं नहीं वैसी होय रहीं है. यद्यपि उनमें विस्तार है तथापि भाषामें विपर्यास होय जायवेसूं मूलकोभी पतो नहीं लगे है. या व्रजभाषान्तरमें प्राय: यह बहोत ध्यान राखो है के मूलको अर्थ सरल रीतिसे समझमें आयवेके अन्वयमें प्राय: अपेक्षित पद बढ़ाये हैं. और समासभी जहांतहांके विशदपदनको करदीनो है. तासूं विशेषसर-लता होयवेकी संभावना है. श्रीमद्वल्लभाचार्यनकी वाणी अनुग्रहैकगम्य है यह ग्रन्थनके देखवेसूं मालुम पडे है. किन्तु संस्कृतटीकानकेद्वारा जो कछु आशय समझमें आयजाय वहभी केवल उनको अनुग्रह है. यासूंही या भाषान्तरमें भी मनुष्यसुलभ प्रमादसूं क्वचित् स्खलित रह गये होय तो सत्पुरुषनकूं चहिये के सुधारके काम चलावें. या जगतमें सर्वपरितोष होनो कठिन है सो चुकभी है क्योंके—

गच्छतः स्खलनं क्वाऽपि भवेदेव प्रमादतः ।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः ॥

अनुवादकर्ता.

॥ श्रीहरिः ॥

व्रजभाषाटीकासहित

श्रीवल्लभाष्टक ।

श्रीमद्वृन्दावनेन्दुप्रकटितरसिकानंदसन्दोहरूप-
स्फूर्जद्रासादिलीलाऽमृतजलधिभराक्रान्तसर्वोऽपि शश्वत् ।
तस्यैवात्मानुभावप्रकटनहृदयस्याज्ञया प्रादुरासी-
द्भूमौ यः सन्मनुष्याकृतिरतिकरुणस्तं प्रपद्ये हुताशम् ।१।

भावार्थ—हमेशां, श्रीवृन्दावनेन्दु (हरि)ने प्रकट कियो जो रसिकनको आनंद समूहरूप, सुन्दररासकों आदिलेकें जो लीला, सोई एक अमृतसिन्धु ताके प्रवाहसूं आप्लावित करदिये हैं सर्वजन जाने, ऐसे, जो श्रीमद्वल्लभाचार्य, और अपने प्रभावके प्रकट करवेकी है इच्छा जाकी, ऐसे उन्हीं श्रीमद्वृन्दावनेन्दुकी आज्ञासूं भुतलपै अतिकरुणा करकें मनुष्याकृतिकों धारण करते प्रकटभये. उन अग्निस्वरूप श्रीवल्लभाचार्यके, मैं शरण जाऊं हूं ।

कठिन समास—श्रीमच्च तद्वृन्दावनं च तस्य इन्दुः, तेन प्रकटितो यो रसिकानंदसंदोहरूपः स्फूर्जद्रासादिलीलाऽमृतजलधिभरः, तेन आक्रान्तः सर्वः येन सः । आत्मनः अनुभावः आत्मानुभावः, तस्य प्रकटने हृदयं यस्य, तस्य । १ ।

नाऽऽविर्भूयाद्भवांश्चेदधिधरणितलं भूतनाथोदिताऽस-
न्मार्गध्वान्तान्धतुल्या निगमपथगतौ देवसर्गेऽपि जाताः ।
घोषाधीशं तदेमे कथमपि मनुजाः प्राप्नुयुर्नैव दैवी-
सृष्टिर्व्यर्था च भूयान्निजफलरहिता देव! वैश्वानरैषा ।२।

पदोपरिवृतानामङ्कानामनुसारेणाऽन्वयो योज्यः ।

भावार्थ—हे देव, हे अग्निस्वरूप! जो आप या भूतलपै प्रकट न होते, तो वेदोक्तमार्गकी सरणीमें दैवसर्गमेंभी पैदाभये, किन्तु महादेवके कहे असन्मार्गके अन्धकारमें अन्धेकी तरह भये, ये जीव, श्रीनंदनंदन श्रीकृष्णकूं कोईतरहसूंभी नहीं प्राप्त होय सकते हे, और अपने श्रीहरिरूपफलसूं रहितभई यह दैवी सृष्टिभी व्यर्थ होय जाती ।

कठिनांशको समास—धरण्यास्तलं, धरणितले इति अधिधरणितलम् । भूतनाथेन उदिताः भूतनाथोदिताः, असन्तश्च ते मार्गाश्च असन्मार्गाः भूतनाथोदिताश्च ते असन्मार्गाश्च, भूतनाथोदिताऽसन्मार्गाणां ध्वान्तं, भूतनाथोदिताऽसन्मार्गध्वान्तेन अंधतुल्याः ते । २ ।

नह्यन्यो वागधीशाच्छ्रुतिगणवचसां भावमाज्ञातुमीष्टे
यस्मात्साध्वी स्वभावं प्रकटयति वधूरग्रतः पत्युरेव ।
तस्माच्छ्रीवल्लभाख्य त्वदुदितवचनादन्यथा रूपयंति
भ्रान्ता ये ते निसर्गत्रिदशरिपुतया केवलान्धंतमोगाः । ३ ।

भावार्थ—वाणीके पतिके सिवाय दूसरो कोईभी श्रुतिगणनके वचनके भावकूं जानवेके लिये समर्थ नहीं है, कारणके पतिव्रता स्त्री अपने पतिके आगेही अपने आशयकूं प्रकट करै है, तासूं हे श्रीवल्लभाचार्य ! जो लोक आपके कहे वचननसूं अन्यथा वेदनको अर्थ कहें हैं, वे स्वभावसूंहीं आसुरप्रकृति होयवेसूं भ्रान्त होते केवल अन्धतमकूं प्राप्त होय हैं ।

क० समा०—निसर्गेण त्रिदशरिपुः निसर्गत्रिदशरिपुः तस्यभावः तत्ता, तया । केवलं च तदन्धं तमश्च केवलान्धंतमः, केवलान्धंतमसि गच्छन्ति ते । ३ ।

प्रादुर्भूतेन भूमौ ब्रजपतिचरणांभोजसेवाख्यवर्त्म
प्राकट्यं यत्कृतं ते तदुत निजकृते श्रीहुताशेति मन्ये ।
यस्मादस्मिँस्थितोयत्किमपि कथमपि क्वाप्युपाहर्तुमिच्छ-
त्यद्धा तद्गोपिकेशः स्ववदनकमले चारुहासे करोति । ४ ।

भावार्थ—भूतलपै प्रकट होयकें आपनें श्रीहरिके चरण-कमलकी सेवा करवेको मार्ग, जो प्रकट कियो हे, सो निश्चय करके अपने भक्तनके लियेही प्रकटकियो है, हे अग्निस्वरूप ! यह मैं मानूं हूं, कारण के यामार्गमें स्थित भक्त, कोईभी वस्तु, कैसी तरहसूंभी, कहूंभी रहकें, अर्पण करनो चाहे तो वा वस्तुकूं श्री-गोपीजनवल्लभ अपने सुन्दर हासवारे मुखकमलमें धारण करें हैं।

क० समा०चरणौ अंभोजे इवेति चरणांभोजे, ब्रजपतेश्चरणांभोजे, ब्रज-पतिचरणांभोजयोः सेवा, सैव आख्या यस्य तत् ब्रजपतिचरणांभोजसेवाख्यं, तच्च वर्त्मच । ४ ।

उष्णत्वैकस्वभावोप्यतिशिशिरवचःपुंजपीयूषवृष्टी-
रार्तेष्वत्युग्रमोहासुरनृपु युगपत्तापमप्यत्र कुर्वन् ।
स्वस्मिन्कृष्णास्यतां त्वं प्रकटयसि च नो भूतदेवत्व-
मेतद्यस्मादानंददं श्रीव्रजजननिचये नाशकं चाऽसुराग्नेः।५।

भावार्थ—उष्णत्वको हे एक स्वभाव जिनको एसेभी, दीन-नके उपर शीतल वचनरूप अमृतवृष्टीकूं और वडे मोहवारे आसुरनपै एक साथही तापभी करते आप, अपनेमें श्रीकृष्णास्य-पनेकूं प्रकट करो हो, किन्तु अग्निपनो प्रकट नहीं करो हो, कारण के यह आपको स्वरूप व्रजजनसमूहमें तो आनंद देय हैं और आसुराग्निकूं नाश करे है ।

कठि० समा०—अतिशिशिराणि च तानि वचांसि च, तेषां पुंजः, स पीयूषं च तस्य वृष्टयः ताः । ५ ।

आम्नायोक्तं यदंभोभवनमनलतस्तच्च सत्यं विभो यं-
त्संर्गादौ भूतरूपादभवदनलतः पुष्करं भूतरूपम् ।
आनंदैकस्वरूपात्त्वदधिभु यदभूत्कृष्णसेवारसाब्धि-
श्चानंदैकस्वरूपस्तदखिलमुचितं हेतुसाम्यं हि कार्ये । ६ ।

भावार्थ—वेदमें कह्यो जो अग्निसूं जलको होनो सो सत्य है, हे प्रभो सृष्टिके आदिमें जैसे भूतस्वरूप अग्निसूं भूतस्वरूप जलभयो, तेसें या भूतलपै आनंदस्वरूप आपसूं यह श्रीकृष्णसे-वारूप रससमुद्रभी आनंदस्वरूपही भयो है, और यह उचितभी है, कारण के कार्यमें कारणको साहश्य आवे है ।

कठि० समा०—आनंद एकं स्वरूपं यस्य सः—तस्मात् । भुवीति-अधिभु । ६ ।

स्वामिन्श्रीवल्लभाग्ने ! क्षणमपि भवतः सन्निधाने कृपातः
प्राणप्रेष्ठव्रजाधीश्वरवदनदिदृक्षार्तितापो जनेषु ।
यत्प्रादुर्भावमाप्नोत्युचिततरमिदं यत्तु पश्चादपीत्थं
दृष्टेऽप्यस्मिन्मुखेन्दौ प्रचुरतरमुदेत्त्येव तच्चित्रमेतत् । ७ ।

भावार्थ—स्वामिन् अग्निस्वरूप आचार्यवर्य ! आपके क्षणभर सन्निधानसूं, कृपाकरके भक्तनकें प्राणनसूं प्रिय श्रीहरिके मुखकम-लकी देखवेकी इच्छाको ताप होय है, सो उचित है, परन्तु पीछें श्रीहरिके मुखकमलकूं देखकेंभी विशेषतर ताप होय है, यह अति

आश्चर्य है । प्रथम औत्सुक्यको ताप और पीछें विरहसूं ताप, यों विरोधको परिहार समझनो ।

कठि० समा०—श्रीवल्लभ एव अग्निः, तत्संबुद्धौ । ७ ।

अज्ञानाद्यंधकारप्रशमनपटुताख्यापनाय त्रिलोक्या-
मग्निस्त्वं वर्णितं ते कविभिरपि सदा वस्तुतः कृष्ण एव ।
प्रादुर्भूतो भवानित्यनुभवनिगमाद्युक्तमानैरवेत्य
त्वां श्रीश्रीवल्लभेमे निखिलवुधजना गोकुलेशं भजन्ते । ८ ।

। इतिश्रीविठ्ठलदीक्षितकृतं श्रीवल्लभाष्टकं सम्पूर्णम् ।

भावार्थ—या भूतलपै पण्डितननें आपको अग्निपनो केवल अज्ञानरूप अंधकारके दूर करवेको चातुर्य प्रकटकरवेके लिये ही कह्यो है, वास्तवमें तो आप श्रीकृष्णही प्रकट भये हो ऐसें अनुभव और शास्त्रादिके प्रमाणनसूं जानकें, हे श्रीवल्लभाचार्य ! सर्व विद्वान् आपकूं गोकुलेश जानकेंहीं भजें हैं । ८ ।

कठि० समास—अज्ञानादि एव अंधकारः, तस्य प्रशमनं, तस्मिन् पटुता, तस्याः ख्यापनं तस्मै ।

इतिश्रीवल्लभाष्टकव्रजभाषा सम्पूर्णा ।

॥ श्रीहरिः शरणम् ॥

व्रजभाषामें.

। श्रीयमुनाष्टककी विवृति ।

जयन्ति वल्लभाचार्यनखचन्द्रमरीचयः ।
यानन्तरा मादृशानां विस्पष्टार्था न तद्गिरः ॥ १ ॥

या श्रीयमुनाष्टके अर्थज्ञानपूर्वक पाठ करवेसों भजनानंदकी सिद्धि होयगी या आशयसों श्रीमद्वल्लभाचार्य आठ श्लोकनकेद्वारा श्रीयमुनाजीके स्वरूपको वर्णन करें हैं ।

नमामि यमुनामहं सकलसिद्धिहेतुं मुदा
मुरारिपदपंकजस्फुरदमंदरेणूत्कटाम् ।
तटस्थनवकाननप्रकटमोदपुष्पाम्बुना
सुरासुरसुपूजितस्मरपितुः श्रियं बिभ्रतीम् । १ ।

अन्वय—सकल सिद्धिहेतुं, मुरारिपदपंकजस्फुरदमंदरेणूत्कटाम्, तटस्थनवकाननप्रकटमोदपुष्पाम्बुना सुरासुरसुपूजितस्मरपितुः श्रियं बिभ्रतीं, यमुनां अहं मुदा नमामि ।

भावार्थ—पुष्टिमार्गीय समस्त सिद्धिनकों देयवेवारीं, और जलको दोषरूप मुरनामक जो दैत्य ताय मारनवारे श्रीकृष्णके चरणारविन्दमें शोभायमान विशेषरेणु है अधिक जिनमें ऐसीं, और दोनो किनारेनपै लगे वनके प्रकटसुगन्धवारे पुष्पनसों युक्त जलकरिके, देवदानवादिसों पूजित प्रद्युम्नजीके पिता श्रीकृष्णकी

स्वरूपशोभाकों धारण करैं ऐसी श्रीयमुनाजीकों मैं आनन्दसों प्रणाम करूं हूं ।

कठिनांशको समास—मुरारिपदपंकजयोः स्फुरन्ती चासौ अमन्दरेणुश्च । मुरारिपदपंकजस्फुरदमंदरेणुः उत्कटा यस्यां सा-ताम् । १ ।

कलिंदगिरिमस्तके पतदमंदपूरोज्ज्वला
विलासगमनोल्लसत्प्रकटगंडशैलोन्नता ।
सघोषगतिदंतुराऽसमधिरूढदोलोत्तमा
मुकुन्दरतिवर्द्धिनी जयति पद्मबंधोः सुता । २ ।

अन्वय—कलिन्दगिरिमस्तके पतदमंदपूरोज्ज्वला, विलासगमनोल्लसत्प्रकटगंडशैलोन्नता, सघोषगतिदंतुरा, असमधिरूढदोलोत्तमा, मुकुन्दरतिवर्द्धिनी पद्मबंधोःसुता जयति ।

भावार्थ—कलिन्द नामक पर्वतके शिखरपै गिरते बहुतसे प्रवाहसों उज्वल दीखतीं, और विलासपूर्वक गमनसों शोभायमान और अच्छीतरह दीखतीं शिलान करिकें, उँची मालुम पडतीं, और ध्वनिसहित चलवेसों नतोन्नत (उंचीनीची) होतीं, ताहीसों मानो उत्तम हिन्दोलामें अच्छीतरह नहीं बैठी होंय कहा ऐसी दीखतीं ऐसीं, श्रीकृष्णमे प्रीतिकों बढायवेवारीं श्रीसूर्यकी पुत्री श्रीयमुनाजी सर्वोत्कर्षसों विराजमान हैं ।

कठि० समास—विलासेन गमनं विलासगमनं, प्रकटाश्चते गंडशैलाश्च प्रकटगंडशैला; विलासगमनेन उल्लसन्तश्चते प्रकटगंडशैलाश्च विलासगमनोल्लसत्प्रकटगंडशैलाः विलासगमनोल्लसत्प्रकटगंडशैलैः उन्नता सा । २ ।

भुवं भुवनपावनीमधिगतामनेकस्वनैः
प्रियाभिरिव सेवितां शुकमयूरहंसादिभिः ।

तरंगभुजकंकणप्रकटमुक्तिकावालुका-
नितंवतटसुन्दरीं नमत कृष्णतुर्यप्रियाम् । ३ ।

अन्वय—भुवनपावनीं, भुवं अधिगतां, प्रियाभिः इव अनेक स्वनैः शुकमयूरहंसादिभिः सेवितां, तरङ्गभुजकंकणप्रकटमुक्तिका-वालुकानितंवतटसुन्दरीं कृष्णतुर्यप्रियां नमत ।

भावार्थ—सकल लोककों पवित्र करनवारीं, और याहीके लिये भूतलपैं पधारीं, तथा प्रियसखीनकी तरह विविध प्रकारसो बोलवे वारे सूआ मोर हंसआदि पक्षीन करिकें सेवित, और लहर-रूप भुजानके धारण किये कंकणनमें प्रकट दीखती मोती जैसी चमकती रेणुसों युक्त कटिपश्चाद्भागसों सोभायमान ऐसीं, श्रीकृष्णकी चोथी पटरानी श्रीयमुनाजीकों सर्वलोक प्रणाम करो ।

कठि० समास—तरंगा एव भुजौ तरंगभुजौ, तयोः कंकणानि तरंग-भुजकंकणनि, तेपु प्रकटा तरंगभुजकंकणप्रकटा, मुक्तिका इववालुका मुक्तिका-वालुका, तरंगभुजकंकणप्रकटाचासौ मुक्तिकावालुका च तरंगभुजकंकण-प्रकटमुक्तिकावालुका, तया युक्तं च तत् नितंवतटं च, तरंगभुजकंकण-प्रकटमुक्तिकावालुकानितंवतटम्, तेन सुन्दरी, ताम् । ३ ।

अनंतगुणभूषिते शिवविरंचिदेवस्तुते
घनाघननिभे सदा ध्रुवपराशराभीष्टदे ।
विशुद्धमथुरातटे सकलगोपगोपीवृते
कृपाजलधिसंश्रिते मम मनःसुखं भावय । ४ ।

अन्वय—अनंतगुणभूषिते, शिवविरंचिदेवस्तुते, घनाघन-निभे, ध्रुवपराशराभीष्टदे, विशुद्धमथुरातटे, सकलगोपगोपीवृते, कृपाजलधिसंश्रिते सदा मम मनःसुखं भावय ।

भावार्थ—अनंत गुणनसों भूपित, और शिवब्रह्मा आदि देवतानसों स्तुति करी गई, और सघन मेघ सदृश कान्तिवारी और ध्रुव पराशर आदि ऋषिनकों सकल मनोरथके देनवारी, और भगवल्लीलाधाम मथुराजी जाके तटपै हैं, और समग्र गोपगोपाङ्गनानसों शोभित, और अनुग्रहके समुद्र श्रीकृष्णके आश्रयमें रहनवारीं हे श्रीयमुनाजी आप मेरे मनके आनन्दको विचार करो, अर्थात् जैसें मेरे मनकूं सुख होय तैसें करो। यह श्लोक श्रीयमुनाजी और श्रीकृष्णमें समानता बतायवे वारो है, तासूं यह सब विशेपण श्रीकृष्णमेंभी लगे हैं। वा पक्षमें यह अर्थ करनो कि हे श्रीयमुनाजी! एसे श्रीकृष्ण भगवान्में मेरे मनकी प्रीतिकूं कराओ।

कठि० समास—अनंताश्च ते गुणाश्च तैर्भूषिता अनंतगुणभूषिता तत्संबुद्धौ। श्रीकृष्णपक्षे, अनंतगुणैर्भूपितस्तस्मिन्। एवं सर्वत्राप्यूह्यम्। ४।

यया चरणपद्मजा मुररिपोः प्रियंभावुका
समागमनतोऽभवत्सकलसिद्धिदा सेवताम्।
तया सदृशतामियात्कमलजा सपत्नीव य-
द्धरिप्रियकलिन्दया मनसि मे सदा स्थीयताम् ५

अन्वय—यया समागमनतः चरणपद्मजा मुररिपोः प्रियंभावुका, सेवतां भुक्तिमुक्तिदा अभवत्, तया सपत्नी इव सदृशतां (का) इयात्, यत् (इयात्—तर्हि) कमलजा इयात्, तया हरिप्रियकलिन्दया मे मनसि सदा स्थीयताम्।

भावार्थ—जिन श्रीयमुनाजीके संग मिलवेसों गंगाजी भगवान्के प्रिय करवेवारी भई और अपने सेवकनकों समग्रसिद्धि

देयवेवारी भई, उन श्रीयमुनाजीके, सौतकीतरह समानभावकों कौन प्राप्त होय, यदि होंय तो श्रीलक्ष्मीजीही प्राप्त होंय, एसीं भगवानकों अतिप्रिय श्रीयमुनाजी मेरे हृदयमें सदा निवास करो।

कठि० समास—समानः पतिर्यस्याः सा। कलिं यतीति, हरिप्रिया चासौ कलिन्दा च, तया। ५।

नमोऽस्तु यमुने सदा तव चरित्रमत्यद्भुतं
न जातु यमयातना भवति ते पयःपानतः।
यमोपि भगिनीसुतान्कथमु हंति दुष्टानपि
प्रियो भवति सेवनात्तव हरेर्यथा गोपिकाः। ६।

अन्वय—हे यमुने सदा नमः अस्तु, तव चरित्रं अत्यद्भुतं (अस्ति) ते पयःपानतः जातु यमयातना न भवति यमः अपि दुष्टान् अपि भगिनीसुतान् उ (अहो) कथं हन्ति, तव सेवनात् यथा गोपिकाः (तथा) हरेः प्रियः भवति।

भावार्थ—हे श्रीयमुनाजी आपकों सदा नमस्कार हो, आपके चरित्र वहुत आश्चर्यकरवेवारेहैं, आपके जलके पानकरवेसों कभी यमसंवंधी पीडा नहीं होय है, यमराजाभी दुष्ट ऐसेभी अपनी भेनके पुत्रनकूं कैसें मारै; आपकी सेवा करवेसों श्रीगोपीजननकी तरह (जीवभी) श्रीहरिकों प्रिय होय है।

कठिनांश समास—पयसःपानं पयःपानं, पयःपानात् इति पयःपानतः।

ममाऽस्तु तव सन्निधौ तनुनवत्वमेतावता
न दुर्लभतमा रतिर्मुररिपौ मुकुन्दप्रिये।

अतोऽस्तु तव लालना सुरधुनी परं संगमा-
त्तवैव भुवि कीर्तिता न तु कदापि पुष्टिस्थितैः ।७।

अन्वय—हे मुकुन्दप्रिये ! तव सन्निधौ मम तनुनवत्वं अस्तु, एतावता मुररिपौ रतिः दुर्लभतमा न (अस्ति), अतः तव लालना अस्तु, सुरधुनी तव एव संगमात् भुवि परं कीर्तिता, तु पुष्टिस्थितैः कदा अपि न (कीर्तिता)।

भावार्थ—हे हरिप्रिय यमुनाजी आपके निकटमें मेरो शरीर दिव्य नवीन होय जाय, अर्थात् लीलामें प्रवेश करवेलायक अलौकिक होयजाय, इतनेसोंही मुरदानवके मारनवारे श्रीकृष्णमें प्रीतिहोनी अतिदुर्लभ नहीं है, ताकारणसों आपके (स्तुतिरूप) लाडचाव हो, श्रीगंगाजी आपके ही समागमसों भूतलमें स्तुतिकरी गई हैं, किन्तु पुष्टिस्थित जीवनने याविषयमें आपके सिवाय उनकी स्तुति नहीं करी है, क्यों कि उनसों मुक्ति मिले है, परन्तु लीलोपयोगी देह नहीं मिले है । ७ ।

स्तुतिं तव करोति कः कमलजासपत्नि ! प्रिये !
हरेर्यदनु सेवया भवति सौख्यमामोक्षतः ।
इयं तव कथाऽधिका सकलगोपिकासंगम-
स्मरश्रमजलाणुभिः सकलगात्रजैः संगमः । ८ ।

अन्वय—कमलजासपत्नि ! प्रिये ! तव स्तुतिं कः करोति, यत् हरेः अनु सेवया आमोक्षतः सौख्यं भवति, तव कथा इयं अधिका, (यत्) सकलगात्रजैः सकलगोपिकासंगमस्मरश्रमजलाणुभिः संगमः भवति ।

भावार्थ—लक्ष्मीकी सपत्नि (सौत) और हरिकों प्रिय हेश्रीयमुनाजी ! आपकी स्तुति कौन करसकै, कारण के जो श्रीहरिके

पीछे लक्ष्मीकी भी सेवा करै, तो ताकों मोक्षपर्यन्तको सुख मिले है, परन्तु आपकी तो कथा इतनी अधिक है, के सर्व अंगसों उत्पन्न भये, जो सकल गोपीजन सों श्रीप्रभुकी लीला, ताके संबंधी जो प्रस्वेदजल उनके बिन्दुनसों आपको संगम होय है।

कठि० समास—सकलगोपिकाभिः संगमः सकलगोपिकासंगमः, तेन स्मरः सकलगोपिकासंगमस्मरः, तस्य श्रमजलं सकलगोपिकासंगमस्मरश्रमजलं, तस्य अणवः, तैः। ८।

तवाष्टकमिदं मुदा पठति सूरसूते सदा
समस्तदुरितक्षयो भवति वै मुकुन्दे रतिः।
तया सकलसिद्धयो मुररिपुश्च संतुष्यति
स्वभावविजयो भवेद्वदति वल्लभः श्रीहरेः॥ ९॥

इतिश्री श्रीमद्वल्लभाचार्यविरचितं यमुनाष्टकं सम्पूर्णम्।

अन्वय—हे सूरसूते! तव इदं अष्टकं (यः) सदा मुदा पठति (तस्य) समस्तदुरितक्षयो भवति, वै मुकुन्दे रतिः भवति, तया सकलसिद्धयः (भवन्ति) च मुररिपुः संतुष्यति, स्वभावविजयः भवेत् (इति) श्रीहरेः वल्लभः वदति।

भावार्थ—हे सूर्यकी पुत्री श्रीयमुनाजी आपके या यमुनाष्टकको जो कोई सदा हर्षसों पाठ करेगो, ताके समग्र पापनको नाश होयगो और निश्चय करिकें श्रीहरिमें प्रीति होयगी, और हरि प्रीति होयवेसों पुष्टिमार्गीय सिद्धि होयगी, तथा श्रीहरि प्रसन्न होंयगे, और यदि स्वभाव दुष्ट होय तो भगवद्भक्ति करवे लायक स्वभाव होय जाय है, एसें श्रीहरिके प्रिय श्रीवल्लभाचार्य कहें हैं॥ ९॥

॥ इति श्रीव्रजभाषासहित श्रीयमुनाष्टक सम्पूर्ण॥

॥ श्रीहरिः ॥

व्रजभाषामें.

वालबोधकी विवृति।

अब पुरुषार्थनके विषयमें होते सन्देहनकों दूर करवेके लिये श्रीमद्वल्लभाचार्य वालबोधनामक ग्रंथको आरम्भ करें हैं।

नत्वा हरिं सदानन्दं सर्वसिद्धान्तसंग्रहम्।
वालप्रबोधनार्थाय वदामि सुविनिश्चितम्। १।

अन्वय—सदानन्दं हरिं नत्वा वालप्रबोधनार्थाय सुविनिश्चितं सर्वसिद्धान्तसंग्रहं (अहं) वदामि।

भावार्थ—सच्चिदानंद श्रीकृष्णकों प्रणाम करकें, अपने हिताहितको न जानवेवारे जीवनकों ज्ञान करायवेके लिये वेदशास्त्रद्वारा निश्चयकिये सर्वसिद्धान्तनके संग्रहकों में कहूं हूं।

कठि० समास—प्रकर्षेण बोधनं प्रबोधनं, वालानां प्रबोधनं वालप्रबोधनं, वालप्रबोधनमेव अर्थः वालप्रबोधनार्थः, तस्मै। १।

धर्मार्थकाममोक्षाख्याश्चत्वारोऽर्था मनीषिणाम्।
जीवेश्वरविचारेण द्विधा ते हि विचारिताः। २।

अन्वय—मनीषिणां धर्मार्थकाममोक्षाख्याः चत्वारः अर्थाः (सन्ति) ते जीवेश्वरविचारेण द्विधा हि विचारिताः।

भावार्थ—बुद्धिमान् पुरुषनके, धर्म अर्थ काम और मोक्ष नामके चार पुरुषार्थ हैं, अर्थात् मनुष्यकर्तव्य हैं, वे चारों पुरु-

पार्थ जीव (ऋषिलोग) और ईश्वर (वेद) के विचारसूं दोतरह विचारे गये हैं, यह बात निश्चय है।

कठि० समास—धर्मार्थकाममोक्षाः आख्याः येषां ते। २।

अलौकिकास्तु वेदोक्ताः साध्यसाधनसंयुताः।
लौकिका ऋषिभिः प्रोक्तास्तथैवेश्वरशिक्षया। ३।

अन्वय—साध्यसाधनसंयुताः अलौकिकाः तु वेदोक्ताः, लौकिकाः तथा एव ईश्वरशिक्षया ऋषिभिः प्रोक्ताः।

भावार्थ—साध्य (यज्ञादि) और साधन (स्रुक्स्रुवादि, यज्ञकी सब सामग्री) सों युक्त, अलौकिक अर्थात् ईश्वरके विचारे पुरुषार्थ तो वेदमें कहे हैं, और जीवविचारित पुरुषार्थ, भगवान्‌की वैसी ही आज्ञा होयवेसूं ऋषिनने कहे हैं, अर्थात् याज्ञवल्क्यादिस्मृतिनमें कहे हैं।

कठिनांशसमास—साध्यं च साधनं च साध्यसाधने, ताभ्यां संयुताः, ते। ३।

लौकिकांस्तु प्रवक्ष्यामि वेदादाद्या यतः स्थिताः।

अन्वय—लौकिकान् तु (अहं) प्रवक्ष्यामि, यतः आद्याः वेदात् (वेदमाश्रित्य) स्थिताः (सन्ति)।

भावार्थ—ऋषिनके विचारे पुरुषार्थनकों तो मैं कहूं हूं, कारणके पहले (ईश्वरविचारित अलौकिक) पुरुषार्थ, वेदको आश्रय लेके स्थित हैं अर्थात् वेदमें हैं, निःसंदेह होयवेसूं उनके कहवेकी जरूरत नहीं है।

धर्मशास्त्राणि नीतिश्च कामशास्त्राणि च क्रमात्। ४।
त्रिवर्गसाधकानीति न तन्निर्णय उच्यते।

अन्वय—धर्मशास्त्राणि च नीतिः च कामशास्त्राणि क्रमात् त्रिवर्गसाधकानि इति (हेतोः) तन्निर्णयः (अस्माभिः) न उच्यते।

भावार्थ—मन्वादि धर्मनिरूपण करवेवारे शास्त्र, और कामन्दकीयादि नीतिशास्त्र (अर्थशास्त्र) तथा वात्स्यायनादि कामशास्त्र, क्रमसों धर्म अर्थ काम इन त्रिवर्गके साधक हैं तासों इनको निर्णय हम नहीं करें हैं। ४।

मोक्षे चत्वारि शास्त्राणि लौकिके परतः स्वतः। ५।
द्विधा द्वे द्वे स्वतस्तत्र सांख्ययोगौ प्रकीर्तितौ।
त्यागात्यागविभागेन सांख्ये त्यागः प्रकीर्तितः। ६।

अन्वय—स्वतः परतः द्विधा लौकिके मोक्षे, द्वे द्वे (कृत्वा इति यावत्) चत्वारि शास्त्राणि (सन्ति), तत्र त्यागात्यागविभागेन सांख्ययोगौ स्वतः प्रकीर्तितौ, सांख्ये त्यागः प्रकीर्तितः (अस्ति)।

भावार्थ—स्वाश्रय और पराश्रय दो प्रकारके ऋपित्रिचारित मोक्षमें दो दो करके चार शास्त्र हैं, उन चार शास्त्रनमें अनात्मवस्तुको त्याग और अत्यागके भेदसों सांख्य और योग यह दोनों स्वाश्रय मोक्षशास्त्र कहे गये हैं, और सांख्यशास्त्रमें अनात्मवस्तुको त्याग करनो कह्यो है।

कठि० समास—त्यागश्च अत्यागश्च त्यागात्यागौ, तयोः विभागः, तेन। ५-६।

सांख्योक्तमोक्षको स्वरूप कहैं हैं

अहंताममतानाशे सर्वथा निरहंकृतौ।
स्वरूपस्थो यदा जीवः कृतार्थः स निगद्यते। ७।

अन्वय—अहंताममतानाशे सति सर्वथा निरहंकृतौ सति

(जीवे इति शेषः) यदा जीवः स्वरूपस्थः (भवति) (तदा) सः कृतार्थः निगद्यते ।

भावार्थ—देहकूं अपनो स्वरूप माननो सो अहंता, और भगवदीयवस्तुमें अपनेपनको भाव करनो सो ममता, इन दोनोनके नाश होयवेसों जब जीव 'में कछु नहीं करूं हूं' एसें सर्वथा अहंकाररहित होयजाय और अपने स्वरूपमें स्थित होय तो वह जीव कृतार्थ कह्यो जाय है, अर्थात् जा जीवकूं, 'में ब्रह्मांश होयवेसों ब्रह्मस्वरूप हूं' एसें ज्ञान होय वह जीव मुक्त कह्यो जाय है ।

कठि० समास—निर्गता अहंकृतिर्यस्मात्, सः, तस्मिन् । ७ ।

तदर्थं प्रक्रिया काचित्पुराणेऽपि निरूपिता ।
ऋषिभिर्बहुधा प्रोक्ता फलमेकमबाह्यतः । ८ ।

अन्वय—तदर्थं ऋषिभिः बहुधा प्रोक्ता काचित् प्रक्रिया पुराणे अपि निरूपिता अबाह्यतः एकं फलम् (भवति) ।

भावार्थ—वा सांख्यमें कहे मोक्षके, लिये, ऋषिनने अनेक प्रकारसूं कही कोईक पद्धति (रीत) श्रीभागवतादि पुराणनमेंभी निरूपण करी है, अनीश्वर सांख्यकूं छोडकें सबको एक फल होय है ।

कठि० समास—बाह्यात् इति बाह्यतः, न बाह्यतः अबाह्यतः । ८ ।

अत्यागे योगमार्गो हि त्यागोऽपि मनसैव हि ।
यमादयस्तु कर्तव्याः सिद्धे योगे कृतार्थता । ९ ।

अन्वय—अत्यागे (सति) हि योगमार्गः हि त्यागः अपि मनसा एव (कर्तव्यः), तु यमादयः कर्तव्याः योगे सिद्धे (सति) कृतार्थता (भवति)

भावार्थ—सर्व वस्तुको त्याग नहीं करवेमें योगमार्ग कह्यो जाय है, यह बात निश्चय है, और त्यागभी मनसूं करनो, अर्थात् मानसिक त्याग करै, और यम नियम आसन प्राणायाम प्रत्याहार ध्यान धारणा समाधि आदि आठ योगके अंग तो जरूर साधने चहियें, जो योग सिद्ध होय जाय तो वह जीवन्मुक्त कह्यो जाय है। ९।

पराश्रयेण मोक्षस्तु द्विधा सोऽपि निरूप्यते।
ब्रह्मा ब्राह्मणतां यातस्तद्रूपेण सुसेव्यते। १०।
ते सर्वार्था न चाद्येन शास्त्रं किंचिदुदीरितम्।

अन्वय—पराश्रयेण मोक्षः तु द्विधा (अस्ति) स अपि निरूप्यते, ब्रह्मा ब्राह्मणतां यातः तद्रूपेण सुसेव्यते, ते सर्वार्था आद्येन न, (यतः) किंचित् शास्त्रं उदीरितं (अस्ति)।

भावार्थ—देवनमें श्रेष्ठ विष्णु और शिवके आश्रयसों मोक्षतो दो प्रकारको है, वहभी कह्यो जाय है, ब्रह्मा ब्राह्मणपनेकों प्राप्त भयो है, और ब्राह्मण रूपसूं पूजित है, तासों पूर्वोक्त चारों पुरुषार्थ ब्रह्मासूं नहीं मिलें हैं, कारण, ब्रह्माने थोडोसो वैखानसमोक्षशास्त्र कह्यो है। १०।

अतः शिवश्च विष्णुश्च जगतो हितकारकौ। ११।
वस्तुनः स्थितिसंहारकार्यौ शास्त्रप्रवर्तकौ।

अन्वय—अतः वस्तुनः स्थितिसंहारकार्यौ शास्त्रप्रवर्तकौ शिवः च विष्णुः च (द्वौ अपि) जगतः हितकारकौ (स्तः)।

भावार्थ—ब्रह्मासों मोक्ष नहीं मिले है तासों, जगत्के संहार और स्थिति (पालन) करवेवारे, और पाशुपत तथा पञ्च-

रात्र शास्त्रके चलायवेवारे, शिव और विष्णु दोनों जगत्के हित करवेवारे हैं ।

कठि० समास—स्थितिश्च संहारश्च स्थितिसंहारौ, तौ कार्ये ययोः, तौ । ११ ।

ब्रह्मैव तादृशं यस्मात्सर्वात्मकतयोदितौ । १२ ।
निर्दोषपूर्णगुणता तत्तच्छास्त्रे तयोः कृता ।

अन्वय—यस्मात्, तादृशं ब्रह्म एव, (तस्मात् तौ) सर्वात्मकतया उदितौ, (किंच) तत्तच्छास्त्रे तयोः निर्दोषपूर्णगुणता कृता (अस्ति) ।

भावार्थ—जाकारणसों ब्रह्मही विष्णु और शिवरूप, होय गयो है, तासों, शास्त्रमें उन दोनोनकों सर्व जगत्के मूलकारण कहे हैं, और अपने २ शास्त्रमें उन दोनोनको दोषरहितपनो और सर्वगुणसंपन्नपनो कह्यो है ।

कठि० समास—सर्वस्य आत्मा सर्वात्मा, सर्वात्मा एव सर्वात्मकः, सर्वात्मकस्य भावः सर्वात्मकता, तया । निर्गताः दोषाः यस्मात् सः, पूर्णाः गुणाः यस्मिन् सः, निर्दोषश्चासौ पूर्णगुणश्च निर्दोषपूर्णगुणः, तस्य भावः तत्ता । १२ ।

भोगमोक्षफले दातुं शक्तौ द्वावपि यद्यपि ।
भोगः शिवेन मोक्षस्तु विष्णुनेति विनिश्चयः । १३ ।

अन्वय—यद्यपि भोगमोक्षफले दातुं द्वौ अपि शक्तौ (स्तः), तु भोगः शिवेन मोक्षः विष्णुना इति विनिश्चयः (अस्ति), ।

भावार्थ—यद्यपि भोग और मोक्षरूप फलकों देयवेमें शिव और विष्णु दोनोही समर्थ हैं, किन्तु भोग शिवसों और मोक्ष विष्णुसों मिले है यह शास्त्रको विशेष निश्चय है । १३ ।

लोकेऽपि यत्प्रभुर्भुङ्क्ते तन्न यच्छति कर्हिचित् ।
अतिप्रियाय तदपि दीयते क्वचिदेव हि । १४ ।

अन्वय—लोके अपि यत् (वस्तु) प्रभुः भुङ्क्ते, तत् (वस्तु) कर्हिचित् न यच्छति, हि तत् अपि अतिप्रियाय क्वचित् एव दीयते ।

भावार्थ—लोकमेंभी जो वस्तु प्रभु, स्वयं भोगे है, वा वस्तुकों कभीभी कोईकों नहीं देय है, किन्तु अपने भोगवेकी वा वस्तुकोंभी अतिप्रिय भक्तके लिये कोईकसमय देय हैं । १४ ।

नियतार्थप्रदानेन तदीयत्वं तदाश्रयः ।
प्रत्त्येकं साधनं चैतद्द्वितीयार्थे महाञ्छ्रमः । १५ ।

अन्वय—नियतार्थप्रदानेन तदीयत्वं तदाश्रयः (सिद्ध्यति), एतत् प्रत्येकं साधनं, द्वितीयार्थे महान् श्रमः (भवति) ।

भावार्थ—शिव और विष्णु यह दोनो देवता यदि अपने भोगवेमें नियमकिये पुरुषार्थकोभी दान करदें तो वासों भक्तको तदाश्रय और तदीयपनो जान्यो जाय है, यह शिवको भजन और विष्णुको भजन एक २ फलको साधन है, दूसरे पुरुषार्थके देते समय शिव और विष्णुकूं (गुणपरिवर्तन करवेसों) अतिश्रम होय है । १५ ।

व्युत्पत्ति—तस्य अयं तदीयः, तदीयस्य भावः तदीयत्वम् ।

जीवाः स्वभावतो दुष्टा दोषाभावाय सर्वदा ।
श्रवणादि ततः प्रेम्णा सर्वं कार्यं हि सिद्ध्यति । १६ ।

अन्वय—जीवाः स्वभावतः दुष्टाः (सन्ति) दोषाभावाय सर्वदा श्रवणादि (कर्तव्यं) ततः प्रेम्णा सर्वं कार्यं सिद्ध्यति हि ।

भावार्थ—जीवमात्र अपने देवमनुष्य आसुर आदि स्वभावनसों दोषवारे हैं (स्वरूपसूं नहीं), वा दोषकी निवृत्तिके लिये, श्रवण कीर्तन स्मरण पादसेवन पूजा प्रणाम दासभाव मित्रभाव और आत्मनिवेदन यह भगवानकी नवधा भक्ति करनी चहिये, या नवधा भक्तिसों श्रीहरिमें प्रेम होय है, और वा प्रेमसों सर्व ऐहिक पारलौकिक कार्य सिद्ध होंय हैं, यह बात निश्चय है । १६ ।

मोक्षस्तु विष्णोः सुलभो भोगश्च शिवतस्तथा ।
समर्पणेनात्मनो हि तदीयत्वं भवेद्ध्रुवम् । १७ ।

अन्वय—मोक्षः तु विष्णोः सुलभः (भवति), च तथा भोगः शिवतः (भवति), आत्मनः समर्पणेन हि ध्रुवं तदीयत्वं भवेत् ।

भावार्थ—मोक्ष तो विष्णुसूं सुलभ है, और तेसेंही भोग शिवसूं सुलभ है, आत्मीय सर्व वस्तुसहित आत्माके भगवच्चरणारविन्दमें अर्पण करवेसों निश्चय करके निश्चल तदीयपनो होय है । १७ ।

अतदीयतया चापि केवलश्चेत्समाश्रितः ।
तदाश्रयतदीयत्वबुद्ध्यै किञ्चित्समाचरेत् । १८ ।
स्वधर्ममनुतिष्ठन्वै भारद्वैगुण्यमन्यथा ।
इत्येवं कथितं सर्वं नैतज्ज्ञाने भ्रमः पुनः । १९ ।

। इतिश्रीवल्लभाचार्यविरचितो बालबोधः सम्पूर्णः ।

अन्वय—च अतदीयतया अपि चेत् केवलः समाश्रितः (तर्हि) तदाश्रयतदीयत्वबुद्ध्यै स्वधर्मं अनुतिष्ठन् किंचित् समाचरेत्, अन्यथा भारद्वैगुण्यं (भवति), एवं इति सर्वं कथितं एतज्ज्ञाने पुनः भ्रमः न (भवति)।

भावार्थ—और पूर्णाधिकारी न होयवेसूं जो तदीयपनो सिद्ध न भयो होय तोभी यदि तदीयपनेसूंरहित जीव भगवान्को आश्रयमात्र ले, तो तदाश्रय और तदीयपनेको ज्ञान होयवेके लिये, अपने वर्णाश्रमधर्ममें रहतो, कछूक दीक्षाग्रहण अथवा मन्त्रोपदेशग्रहणरूप सदनुष्ठान करै, जो एसो न करै तो दुगनो भार होय है अर्थात् एक वर्णाश्रमधर्मपरित्यागरूपभार और दूसरो निष्फलश्रवणादि साधनरूपभार माथे पडे है, या रीतिसों यह सब हमने कह्यो याको अच्छीतरह ज्ञान होय तो फिर पुरुषार्थ विषयमें सन्देह नहीं होय।

कठि० समास—तदीयस्य भावः तदीयता, न तदीयता अतदीयता, तया। तदाश्रयश्च तदीयत्वं च तदाश्रयतदीयत्वे, तयोः बुद्धिः तदाश्रयतदीयत्वबुद्धिः, तस्यै। द्वौ गुणौ यस्य सः, द्विगुणः, तस्य भावः द्वैगुण्यं, भारस्य द्वैगुण्यं भारद्वैगुण्यम्। १८। १९।

इतिश्री बालबोधव्रजभाषाटीका सम्पूर्णा.

॥ श्रीहरिः ॥

ब्रजभाषामें

सिद्धान्तमुक्तावलीकी विवृति।

नत्वा हरिं प्रवक्ष्यामि स्वसिद्धान्तविनिश्चयम्।
कृष्णसेवा सदा कार्या मानसी सा परा मता। १।

अन्वय—हरिं नत्वा स्वसिद्धान्तविनिश्चयं (अहं) प्रवक्ष्यामि, सदा कृष्णसेवा कार्या सा मानसी परा मता।

भावार्थ—सर्व दुःख दूर करवेमें समर्थ श्रीकृष्णकूं नमन करके, अपने सिद्धान्तके निश्चयकों में कहूंगो, सर्वकालमें श्रीहरिकी सेवा करनी चहिये, वह सेवा (भक्ति) मानसिक होनी, यह परम फलरूप कही है। १।

चेतस्तत्प्रवणं सेवा तत्सिद्ध्यै तनुवित्तजा।
ततः संसारदुःखस्य निवृत्तिर्ब्रह्मबोधनम्। २।

अन्वय—तत्प्रवणं चेतः सेवा, तत्सिद्ध्यै तनुवित्तजा (कर्तव्या), ततः संसारदुःखस्य निवृत्तिः (किंच) ब्रह्मबोधनं (भवति)।

भावार्थ—श्रीहरिमें चित्तको एकतान होनो ही सेवा कही जाय है, वैसी सेवाकी सिद्धिकेलिये शरीरसों और मण्डानादिद्वारा द्रव्यसों सेवा (भक्ति) करनी चहिये, वा मानसिकभक्तिसों, अहंताममता आदि संसारकी निवृत्ति, और भगवन्माहात्म्यको ज्ञान, यह दो अवांतर फल मिलें हैं।

क० समा०—तस्मिन् प्रवणं तत्प्रवणं । तनुश्च वित्तं च तनुवित्ते तनुवित्ताभ्यां जाता तनुवित्तजा । २ ।

परं ब्रह्म तु कृष्णो हि सच्चिदानन्दकं बृहत् ।
द्विरूपं तद्धि सर्वं स्यादेकं तस्माद्विलक्षणम् । ३ ।
अपरं, तत्र पूर्वस्मिन्वादिनो बहुधा जगुः ।
मायिकं सगुणं कार्यं स्वतन्त्रं चेति नैकधा । ४ ।

अन्वय—हि परं ब्रह्म तु कृष्णः (अस्ति) सच्चिदानन्दकं बृहत् (अस्ति) तत् हि एकं सर्वं स्यात्, अपरं तस्मात् विलक्षणं, तत्र पूर्वस्मिन् वादिनः बहुधा जगुः, मायिकं सगुणं कार्यं च स्वतन्त्रं इति एकधा न जगुः ।

भावार्थ—शास्त्रमें श्रीकृष्णकूं ही परब्रह्म कहे हैं तासूं, परब्रह्म तो श्रीकृष्ण हैं, सत्चित्गणितानंद अक्षरब्रह्म है, वह अक्षरब्रह्म निश्चयकरकें दो प्रकारको है, एक सर्वजगत्रूप है, और दूसरो वा जगत्रूपसों जुदो है जाको ज्ञानी विचार करें हैं, उन दोनोंरूपनमें, पहले जगत्रूप ब्रह्मके विषयमें वादी अर्थात् विवाद करवेवारे अनेक प्रकारसों कहें हैं, कितनेही या जगत्कूं मायासों दीखतो कहें हैं, कितनेही त्रिगुणात्मक अर्थात् सत् रजस् तमस् इन तीन गुणसूं वन्यो है एसें कहें है, और कोई कहें हैं कि यह जगत् ईश्वरने वनायो है अर्थात् ईश्वरको कार्य है, कितनेही कहें हैं कि प्रवाहकी तरह अनादिकालसूं स्वतन्त्र ही चल्यो आवेहे ऐसें एक प्रकारसों नहीं कहें हैं ।

कठि० समास—अल्पः आनंदः आनन्दकः, सत् च चित् च आनन्दकश्च सच्चिदानन्दकाः, ते सन्ति यस्मिन् तत् सच्चिदानन्दकम् । ४ ।

तदेवैतत्प्रकारेण भवतीति श्रुतेर्मतम्[1]।
द्विरूपं चापि गंगावज्ज्ञेयं सा जलरूपिणी । ५ ।
माहात्म्यसंयुता नृणां सेवतां भुक्तिमुक्तिदा ।
मर्यादामार्गविधिना तथा ब्रह्माऽपि बुद्ध्यताम् । ६ ।

अन्वय—तत् एव एतत्प्रकारेण भवति इति श्रुतेः मतं, च द्विरूपं अपि गंगावत् ज्ञेयं, (एका) सा जलरूपिणी (अपरा) माहात्म्यसंयुता मर्यादामार्गविधिना सेवतां नृणां भुक्तिमुक्तिदा (अस्ति) तथा ब्रह्म अपि बुध्यताम् ।

भावार्थ—वह अक्षरब्रह्म ही या जगत्प्रकारसों होय है यह वेदको मत है, और दोरूपवारो अक्षरब्रह्मभी गंगाकी तरह जाननो, एक गंगा जलरूप है, और दूसरी माहात्म्यसंयुक्त तीर्थरूप जो मर्यादामार्गकी रीतिसूं सेवनकरवेवारे मनुष्यनकूं भोग और मोक्ष देवेवारी है, ऐसेहीं अक्षरब्रह्मभी दो प्रकारको जाननो।

कठिनांश समास—द्वे रूपे यस्य तत् द्विरूपं, । ५ । ६ ।

तत्रैव देवता मूर्तिर्भक्त्या या दृश्यते क्वचित् ।
गंगायां च विशेषेण प्रवाहाभेदबुद्धये । ७ ।

अन्वय—तत्र एव या देवता मूर्तिः (सा) भक्त्या च विशेषेण प्रवाहाभेदबुद्धये क्वचित् गंगायां दृश्यते ।

भावार्थ—वा तीर्थरूप और जलरूप गंगामें ही जो देवतारूप गंगाकी मूर्ति है, वह गंगा, भक्तिके उत्कर्ष होयवेसूं और विशेषकरके जाकूं प्रवाह और मूर्तिमें अभेद बुद्धि होय वा भक्तकूं ही कोईसमय गंगामें दीखे है ।

---

[1] अत्र चक्षिङो ङित्करणाज्ज्ञापकात्–अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यमिति बोध्यम् । अनुवादकः

क० समा०—अभेदेन बुद्धिः अभेदबुद्धिः प्रवाहे अभेदबुद्धिर्यस्य सः, तस्मै । ७ ।

प्रत्यक्षा सा न सर्वेषां प्राकाम्यं स्यात्तया जले ।
विहिताच्च फलात्तद्धि प्रतीत्याऽपि विशिष्यते । ८ ।

अन्वय—सा सर्वेषां प्रत्यक्षा न, तया जले प्राकाम्यं स्यात्, हि तत्, विहितात् फलात् च प्रतीत्या अपि विशिष्यते ।

भावार्थ—वह देवमूर्ति गंगा सबनकूं प्रत्यक्ष नहीं दीखे है, वा गंगासूं ही जलमें स्नान आचमन आदि उत्तम कार्य करनो सिद्ध होय है, कारणके वह जल, शास्त्रमें कहे फलकूं देयवेसूं और महात्मानके विश्वाससूंभी अन्यजलकी अपेक्षा उत्तम समझो जाय है । ८ ।

यथा जलं तथा सर्वं यथा शक्ता तथा बृहत् ।
यथा देवी तथा कृष्णस्तत्राप्येतदिहोच्यते । ९ ।

अन्वय—यथा जलं तथा सर्वं यथा शक्ता (गङ्गा पवित्रीकर्तुं) तथा बृहत् (ब्रह्म सर्व शक्तं) यथा देवी (गङ्गा) तथा कृष्णः (परब्रह्म) तत्रापि इह एतद् उच्यते ।

भावार्थ—तासूं, जैसे संकोचविकासी गंगाको जल है, तैसेही यह जगत्‌रूप ब्रह्म भी आविर्भाव तिरोभाव धर्मवारो है, और जैसे पवित्रकरवेवारी सामर्थ्यरूप गंगा है, तेसें सर्वशक्तिमान् अक्षरब्रह्म है, तथा जैसे आधिदैविक देवीरूप गंगा है, वैसेही परब्रह्म श्रीकृष्णभी आधिदैविक स्वरूप हैं, तामेंभी यहां इतनो और कह्यो जाय है । ९ ।

जगत्तु त्रिविधं प्रोक्तं ब्रह्मविष्णुशिवास्ततः ।
देवतारूपवत्प्रोक्ता ब्रह्मणीत्थं हरिर्मतः । १० ।

अन्वय—जगत् तु त्रिविधं प्रोक्तं, ततः ब्रह्मविष्णुशिवाः देवतारूपवत् प्रोक्ताः, ब्रह्मणि, हरिः इत्थं मतः ।

भावार्थ—जगत् तो सत्वादि गुणनके भेदसूं तीन प्रकारको है, तासूं वा जगत्के नेता ब्रह्मा विष्णु और शिव, लोकमें उपासनाकरवेलायक देवता कहे हैं, और अक्षरब्रह्ममें श्रीकृष्णही सेव्य देवता माने हैं, अर्थात् ज्ञानी मुक्त जीवकूं भजवेलायक तो श्रीकृष्ण हैं।

कठि० समास—तिस्रो विधाः यस्य तत्। देवतारूपेण तुल्याः देवतारूपवत्। १०।

कामचारस्तु लोकेऽस्मिन्ब्रह्मादिभ्यो न चाऽन्यथा।
परमानन्दरूपे तु कृष्णे स्वात्मनि निश्चयः। ११।

अन्वय—अस्मिन् लोके कामचारः तु ब्रह्मादिभ्यः, (भवति), च अन्यथा न, स्वात्मनि तु परमानन्दरूपे कृष्णे निश्चयः (भवति)।

भावार्थ—या सात्विकादि तीन प्रकारके लोकमें उन २ के भक्तनकी लौकिक मनोरथ पूर्तितो ब्रह्मादि तीनो देवतानसूं ही होय है, और तरहसूं नहीं होय सकै, और अपने आत्माके लिये तो नित्य निरवधिक आनन्दरूप श्रीकृष्णमें ही सकलमनोरथपूर्तिको समूह होय है।

कठि० समास—स्वस्य आत्मा स्वात्मा, तस्मिन्। स्वात्मने इत्यर्थः। अत्र 'निमित्तात्कर्मयोगे' इतिसूत्रेण 'चर्मणि द्वीपिनं हन्ती'तिवत् चतुर्थ्यर्थे सप्तमी ज्ञेया। निःशेषाणां चयः निश्चयः, सर्वकाममूलभूतानन्दप्राप्तिरित्यर्थः। ११।

अतस्तु ब्रह्मवादेन कृष्णे बुद्धिर्विधीयताम्।
आत्मनि ब्रह्मरूपे हि छिद्रा व्योम्नीव चेतनाः। १२।

अन्वय—अतः तु ब्रह्मवादेन कृष्णे बुद्धिः विधीयतां, हि ब्रह्मरूपे आत्मनि, व्योम्नि छिद्रा इव, चेतनाः (सन्ति)।

भावार्थ—तासों सर्ववस्तु ब्रह्मात्मक है, या भावसों श्रीकृष्णमें अंतःकरण लगाओ, ब्रह्मांश होयवेसों ब्रह्मरूप आत्मामें, आकाशमें छिद्रकीतरह अनेकतरहकी बुद्धि मालुम पडैं हैं, अर्थात् आकाशमें छिद्र उपाधिसूं हैं, ऐसें ही आत्मामें बुद्धिभी औपाधिक हैं, और विविधप्रकारकी हैं, और उन्हींसों जीवको बंधन होय रह्यो है।

कठि० समास—सर्वं ब्रह्म इति वादः ब्रह्मवादः, तेन। १२।

उपाधिनाशे विज्ञाने ब्रह्मात्मत्वावबोधने।
गंगातीरस्थितो यद्वद्देवतां तत्र पश्यति। १३।
तथा कृष्णं परं ब्रह्म स्वस्मिन्ज्ञानी प्रपश्यति।

अन्वय—यद्वत् गंगातीरस्थितः तत्र देवतां पश्यति, तथा उपाधिनाशे (सति) (च) ब्रह्मात्मत्वावबोधने विज्ञाने (सति) ज्ञानी, स्वस्मिन् परंब्रह्म कृष्णं प्रपश्यति।

भावार्थ—जैसे गंगाकेतीरपै स्थित, और प्रवाह मूर्ति आदिगंगामें एकभाववारो गंगाको भक्त, प्रवाहरूप गंगामें ही देवतारूप गंगाजीको दर्शन करे है, तेसेंही अविद्यारूप उपाधिके नाश भयेसूं और 'सर्व वस्तु ब्रह्मरूप है' एसो यथार्थ ज्ञानरूप अनुभव होयवेसूं ज्ञानीभी अपनी आत्मामें परब्रह्म श्रीकृष्णको दर्शन करै है।

कठि० समास—ब्रह्म आत्मा यस्य तत् ब्रह्मात्म, ब्रह्मात्मनः भावः ब्रह्मात्मत्वं, ब्रह्मात्मत्वेन अवबोधनं, तस्मिन्। १३।

संसारी यस्तु भजते स दूरस्थो यथा तथा। १४।
अपेक्षितजलादीनामभावात्तत्र दुःखभाक्।

अन्वय—यथा दूरस्थः अपेक्षितजलादीनां अभावात् तत्र दुःखभाक् (भवति), तथा यः संसारी तु (श्रीकृष्णं) भजते, सः (दर्शनाभावात्) दुःखभाक् (भवति)।

भावार्थ—जैसे गंगासों दूर स्थित मनुष्य, इच्छित जल और दर्शनके न होय वेसों वहां दुखी होय है, तैसेहीं जो अहंताममतामें बँध्यो जीव कृष्णकोभी भजन करै, तो वह भगवद्दर्शन न होयवेसों केवल दुःखी होय है।

कठिनांश समास—जलं आदिर्येषां तानि जलादीनि, अपेक्षितानि च तानि जलादीनि च, तेषां। १४।

तस्माच्छ्रीकृष्णमार्गस्थो विमुक्तः सर्वलोकतः। १५।
आत्मानंदसमुद्रस्थं कृष्णमेव विचिन्तयेत्।

अन्वय—तस्मात् श्रीकृष्णमार्गस्थः सर्वलोकतः विमुक्तः (सन्) आत्मानंदसमुद्रस्थं कृष्णं एव विचिन्तयेत्।

भावार्थ—तासों श्रीभगवन्मार्गमें रहवेवारो पुरुष तो अहंताममतारूप संसारसूं अलग रहतो, निज आनंदसमुद्रमें विहारकरते श्रीकृष्णकोही स्मरण करै।

कठि० समा०—आत्मनः आनंदः आत्मानंदः, स एव समुद्रः, आत्मानंदसमुद्रः, तस्मिन् तिष्ठति सः, तम्। १५।

लोकार्थी चेद्भजेत्कृष्णं क्लिष्टो भवति सर्वथा। १६।
क्लिष्टोऽपि चेद्भजेत्कृष्णं लोको नश्यति सर्वथा।

अन्वय—(यः) लोकार्थी (सन्) कृष्णं चेत् भजेत् (तर्हि) (सः) सर्वथा क्लिष्टः भवति, क्लिष्टः अपि (जनः) चेत् कृष्णं भजेत् (तस्य) सर्वथा लोकः नश्यति।

भावार्थ—जो पुरुष, लौकिककामनानको प्रयोजन राखकें जो कदाचित् श्रीकृष्णकी सेवा करै, तो वह सबतरहसूं क्लेश पावै है, और संसारसूं दुर भयो पुरुष जो भगवद्भजन करै, तो वाको सबतरहसों अहंताममतारूप संसार दूर होय है। १६।

ज्ञानाऽभावे पुष्टिमार्गी तिष्ठेत्पूजोत्सवादिषु । १७ ।
मर्यादास्थस्तु गंगायां श्रीभागवततत्परः ।
अनुग्रहः पुष्टिमार्गे नियामक इति स्थितिः । १८ ।

अन्वय—पुष्टिमार्गी ज्ञानाभावे श्रीभागवततत्परः (सन्) पूजोत्सवादिषु तिष्टेत्, मर्यादास्थः तु ज्ञानाभावे श्रीभागवततत्परः (सन्) गङ्गायां तिष्टेत्, पुष्टिमार्गे अनुग्रहः नियामकः इति स्थितिः (अस्ति)।

भावार्थ—पुष्टिमार्गीय भक्त, ज्ञानके अभावमें अर्थात् अपनेस्वरूप और भगवत्स्वरूपको ज्ञान न होयतो, श्रीभागवतमें तत्पर रहतो, एकादशस्कंधमें कही पूजाकी रीति और पर्वनमें अनेक उत्सव जहां होते होंय वहां रहै, और मर्यादामार्गीय भक्त तो ज्ञानके अभावमें श्रीभागवतमें तत्पर रहतो श्रीगंगातटपै रहै, अनुग्रहमार्गमें भगवानको अनुग्रहही स्थान आदिको नियमकरवेवारो है यह भगवन्मार्गकी मर्यादा है, अर्थात् जहां भगवान् अनुग्रह करते होंय वहां पुष्टिमार्गीय भक्त रहै ।

कठि० समा०—मृग्यते अनेन इतिमार्गः पुष्टिरेव मार्गः पुष्टिमार्गः, तस्मिन् । पूजाश्च उत्सवाश्च पूजोत्सवाः पूजोत्सवाः आदिर्येषां ते, तेषु । श्रीमच्च तद्भागवतं च श्रीभागवतं, तस्मिन् तत्परः श्रीभागवततत्परः । १८ ।

उभयोस्तु क्रमेणैव पूर्वोक्तैवं फलिष्यति ।
ज्ञानाधिको भक्तिमार्ग एवं तस्मान्निरूपितः । १९ ।

अन्वय—उभयोः तु क्रमेण एव पूर्वोक्ता एव फलिष्यति, (यतः) भक्तिमार्गः ज्ञानाधिकः (अस्ति) तस्मात् एवं निरूपितः।

भावार्थ—मर्यादामार्गीय और पुष्टिमार्गीय भक्तनकूं क्रमसूं ही पूर्वमें कही मानसी सेवाही प्राप्त होयगी, भेद इतनोही है के

मर्यादामार्गीयकूं अनुग्रहमार्गमें आयवेसूं प्राप्त होयगी, क्यों कि 'क्लेशोधिकतरस्तेषां' इत्यादि वचननसों यह सिद्ध है, और अतएव भक्तिमार्ग ज्ञानमार्गसूं अधिक है, तासूं हीं ऐसो निरूपण कियो है।

कठि० समास—ज्ञानात् अधिकः ज्ञानाधिकः । १९ ।

भक्त्यभावे तु तीरस्थो यथा दुष्टैः स्वकर्मभिः ।
अन्यथाभावमापन्नस्तस्मात्स्थानाच्च नश्यति । २० ।

अन्वय—यथा तीरस्थः भक्त्यभावे तु दुष्टैः स्वकर्मभिः अन्यथाभावं आपन्नः (सन्) तस्मात् स्थानात् नश्यति, (तथा, भक्तोऽपि नश्यतीत्यर्थः) ।

भावार्थ—जैसे गंगातीरपै रहतो पुरुष, भक्ति न होय तो अपने दुष्टकर्मनसूं पाखंडीपनेकूं प्राप्त होयकें और तीर्थज्ञानरूप स्थानसूंभी नष्ट होय जाय है, तैसे भक्तभी भक्तिके अभावमें अपने दुष्कर्मनसूं वा स्थानसूं भ्रष्ट होय नीच योनीनमें जन्म ले है । भक्तेः अभावः भक्त्यभावः । २० ।

एवं स्वशास्त्रसर्वस्वं मया गुप्तं निरूपितम् ।
एतद्बुध्वा विमुच्येत पुरुषः सर्वसंशयात् । २१ ।

। इतिश्रीवल्लभाचार्यविरचिता सिद्धान्तमुक्तावली सम्पूर्णा ।

अन्वय—एवं मया गुप्तं स्वशास्त्रसर्वस्वं निरूपितं एतत् बुध्वा पुरुषः सर्वसंशयात् विमुच्येत ।

भावार्थ—या रीतिसों मैने अपने शास्त्रको गोप्य सेवारूप सिद्धान्त कह्यो, याकूं जानकें पुरुष सर्वसन्देहनसूं मुक्त होय है ।२१।

। इतिश्रीसिद्धान्तमुक्तावलीव्रजभाषाटीका सम्पूर्णा ।

॥ श्रीहरिः ॥

ब्रजभाषामें.

पुष्टिप्रवाहमर्यादाभेदकी विवृति।

पुष्टिप्रवाहमर्यादा विशेषेण पृथक् पृथक् ।
जीवदेहक्रियाभेदैः प्रवाहेण फलेन च । १ ।
वक्ष्यामि सर्वसंदेहा न भविष्यन्ति यच्छ्रुतेः ।

अन्वय—पृथक् पृथक् विशेषेण, जीवदेहक्रियाभेदैः, प्रवाहेण, च फलेन पुष्टिप्रवाहमर्यादाः (अहं) वक्ष्मामि, यच्छ्रुतेः सर्वसंदेहा न भविष्यन्ति ।

भावार्थ—पुष्टि प्रवाह और मर्यादा इन तीननके जुदे २ विशेष (धर्म) नसूं, सृष्टिकी चलती परंपरासूं, जुदे २ मिलते फलसूं और जीव देह क्रिया इनके भेदनसूं पुष्टिमार्ग, प्रवाहमार्ग और मर्यादामार्गको निरूपण (मैं) करूंगो, जाके श्रवणकरेसूं सवतरहके संदेह दूर होंयगे ।

कठि० समा०—पुष्टिश्च प्रवाहश्च मर्यादा च पुष्टिप्रवाहमर्यादाः, ताः । जीवश्च देहश्च क्रियाश्च जीवदेहक्रियाः, तासां भेदाः, तैः । यासां श्रुतिः यच्छ्रुतिः, तस्याः । १ ।

भक्तिमार्गस्य कथनात्पुष्टिरस्तीति निश्चयः । २ ।

अन्वय—भक्तिमार्गस्य कथनात् पुष्टिः अस्ति इति निश्चयः (अस्ति)।

भावार्थ—शास्त्रनमें 'नायमात्मा' 'केवलेन हि भावेन'

इत्यादिवचननसूं भक्तिमार्ग जुदोही कह्योहे तासूं निश्चय होय है के भगवान्‌को अनुग्रह है, और ताहीसूं यहभी मालुम पडेहे के पुष्टि (अनुग्रह) मार्गभी जुदोही है । २ ।

'द्वौ भूतसर्गौ ' वित्युक्तेः प्रवाहोऽपि व्यवस्थितः
वेदस्य विद्यमानत्वान्मर्यादापि व्यवस्थिता । ३ ।

अन्वय—'द्वौ भूतसर्गौ' इत्युक्तेः प्रवाहः अपि व्यवस्थितः (अस्ति) (किंच), वेदस्य विद्यमानत्वात् मर्यादा अपि व्यवस्थिता (अस्ति) ।

भावार्थ—गीताजीमें श्रीकृष्णने अर्जुनसूं कही है के 'या लोकमें दैव और आसुरभेदसों प्राणीनकी दोतरहकी सृष्टि है' तासूं प्रवाहमार्गभी सिद्ध है, और कर्मादिकी व्यवस्थाकरवेवारो वेद विद्यमान है, तासूं सिद्ध है के मर्यादामार्गभी अनादिकालसूं चलो आवे है । ३ ।

कश्चिदेव हि भक्तोहि 'योमद्भक्त ' इतीरणात् ।
सर्वत्रोत्कर्षकथनात् पुष्टिरस्तीति निश्चयः । ४ ।
न सर्वोऽतः प्रवाहाद्धि भिन्नो वेदाच्च भेदतः ।
'यदा यस्येति ' वचनान्नाहं वेदैरितीरणात् । ५ ।

अन्वय—'यो मद्भक्त' इति ईरणात् (किंच) सर्वत्र उत्कर्षकथनात् पुष्टिः अस्ति इति निश्चयः, हि कश्चित् एव भक्तः, सर्वः न, अतः प्रवाहात् हि (पुष्टिमार्गः) भिन्नः (अस्ति) च 'यदा यस्येति' वचनात् 'नाहं वेदैः' इति ईरणात् वेदतः (अपि) भेदतः (स्थित इति शेषः) ।

भावार्थ—गीताजीमें भगवान्ने 'जो मेरो भक्त हे सो मोकूं प्रिय है' यह कह्यो है तासूं, और सर्वशास्त्रनमें भक्तिको उत्कर्ष कह्यो हे तासूं, पुष्टिमार्ग है यह सिद्ध होय है, कारण के कोईक ही भक्त होय है, सब नहीं होंय हैं, तासूंभी पुष्टिमार्ग, प्रवाहमार्गसूं भिन्न है यह निश्चय है, । तथा 'जब भगवान् अनुग्रह करें हैं तब भक्त, लोकमार्ग और वेदमार्गमें बुद्धि नहीं लगावे है'या भागवतके वचनसूं तथा 'मेरो ऐसो दर्शन वेदादिसों नही होय है' या भगवान्के वचनसूंभी यह निश्चय होय है के पुष्टिमार्ग, मर्यादामार्गसोंभी भिन्नतया स्थित है, अर्थात् भिन्न है।

कठि० समास—उत्कर्षस्य कथनं उत्कर्षकथनं, तस्मात्, भेदं आश्रित्य स्थितः इति भेदात्। ४–५ ।

। कोईके पूर्वपक्षको उत्तर कहें हैं ।

मार्गैकत्वेऽपि चेदन्त्यौ तनू भक्त्यागमौ मतौ ।
न तद्युक्तं सूत्रतो हि भिन्नो युक्त्या हि वैदिकः । ६ ।

अन्वय—मार्गैकत्वे अन्त्यौ अपि तनू (च) भक्त्यागमौ मतौ इति चेत्, तत् युक्तं न, हि सूत्रतः युक्त्या वैदिकः (मार्गः) हि भिन्नः (अस्ति) ।

भावार्थ—तीनोनकूं एकही मार्ग मानो अर्थात् प्रवाह और मर्यादामार्ग दोनो भक्तिमार्गके अंग है, तथा भक्तिके साधन शास्त्र हैं, एसें कहो तो भी युक्त नहीं, कारणके मुख्यको फलही जामें फल मानो जाय, ताकूं अंग कहें हैं, परन्तु यहां मर्यादाको फल 'तन्निष्ठस्य मोक्षोपदेशात्' या सूत्रसूं अक्षरैक्य कह्यो है, और भक्तिको फल 'तत्संस्थस्यामृतत्वोपदेशात्' या शांडिल्य-

सूत्रसूं आनंद प्राप्ति कही है, तासूं फल जुदे २ होयवेसूं दोनो मार्ग जुदे हैं, और प्रवाहको तो संसार फल है तासूं वहभी भक्तिमार्गको अंग नहीं होय सके है ।

कठि० समास—एकस्य भावः एकत्वं मार्गाणां एकत्वं मार्गैकत्वम् ।६।

जीवदेहकृतीनां च भिन्नत्वं नित्यताश्रुतेः ।
यथा तद्वत्पुष्टिमार्गे द्वयोरपि निषेधतः । ७ ।
प्रमाणभेदाद्भिन्नो हि पुष्टिमार्गो निरूपितः ।

अन्वय—यथा पुष्टिमार्गे श्रुतेः जीवदेहकृतीनां भिन्नत्वं, तद्वत् नित्यता च (सिद्ध्यति) हि द्वयोः अपि निषेधतः, (किंच) प्रमाणभेदात् पुष्टिमार्गः भिन्नः निरूपितः ।

भावार्थ—जैसे पुष्टिमार्गमें श्रुतिके प्रमाणसूं पुष्टिमार्गीय जीव देह और उनकी क्रिया जुदी हैं, तैसें उनकी नित्यताभी 'ध्रुवा सोऽस्य कीरयः' श्रुतिसों मानी है, याही कारणसूं 'स जहाति मतिं लोके वेदे च परिनिष्ठितां' इत्यादि प्रमाणनसूं प्रवाह और मर्यादा दोनों मार्गनमें पुष्टिफल (भगवत्प्राप्ति) के मिलवेको निषेध कियो है तासूं, और प्रवाहमर्यादामार्गनकूं प्रतिपादनकरनवारे शास्त्रनके भेदसूंभी पुष्टिमार्ग, दोनोनसूं भिन्नही कह्यो गयो है ।

कठि० समास—जीवाश्च देहाश्च कृतयश्च जीवदेहकृतयः, तासाम् ।७।

सर्गभेदं प्रवक्ष्यामि स्वरूपांगक्रियायुतम् । ८ ।
इच्छामात्रेण मनसा प्रवाहं सृष्टवान्हरिः ।
वचसा वेदमार्गं हि पुष्टिं कायेन निश्चयः । ९ ।

अन्वय—स्वरूपांगक्रियायुतं सर्गभेदं प्रवक्ष्यामि, हरिः इ-

च्छामात्रेण मनसा प्रवाहं सृष्टवान्, वचसा, वेदमार्गं हि (सृष्टवान्) कायेन पुष्टिं (सृष्टवान्) (इति) निश्चयः (अस्ति) ।

भावार्थ—जीवदेह और क्रियान सहित तीनोमार्गनके सृष्टिभेदकूं कहूं हूं, 'वहुस्यां प्रजायेय' 'न तत्र रथाः' 'विद्धि मायामनोमयं' आदि श्रुतिनसूं मालुम पडै है के श्रीहरिने इच्छाद्वारा मनसूं प्रवाहमार्गकी सृष्टि करी, और 'स भूरिति व्याहरन्भूमिमसृजत' 'वेदशब्देभ्य एवादौ पृथक्संस्थाश्च निर्ममे' आदि वचननसूं ज्ञात होय है के वाणीसूं मर्यादामार्ग पैदा कियो तथा 'द्वेधाऽपातयत्' 'स नैव रेमे' 'स हैतावानास' आदि वचननसूं जान्यो जाय है के स्वरूपसूं पुष्टिमार्गकी सृष्टि निजरमणके लिये करी है, ऐसो निश्चय है ।

कठि० समास—स्वरूपं च अंगं च क्रियाश्च स्वरूपांगक्रियाः, ताभिर्युतः, तम् । ८–९ ।

मूलेच्छातः फलं लोके वेदोक्तं वैदिकेऽपि च ।
कायेन तु फलं पुष्टौ भिन्नेच्छातोऽपि नैकता । १० ।

अन्वय—लोके मूलेच्छातः फलं (भवति), च वैदिके अपि वेदोक्तं (फलं) तु पुष्टौ कायेन फलं, (एवं) भिन्नेच्छातः अपि एकता न ।

भावार्थ—'शुक्लकृष्णे गतीह्येते' इत्यादि वचननसों मालुम पडै है, के प्रवाहमार्गमें 'सृष्टि हमेशां चलती रहै' या इच्छासों लौकिक फल मिलें हैं, और मर्यादामार्गमें अंक्षरमें मिलजानो यह वेदोक्त फल मिले है, किन्तु 'नायं सुखापो' आदि वाक्यनसूं पुष्टिमार्गमें निजस्वरूपसूं फल मिले है, तासूं फलदेयवेकी अलग २ इच्छा होयवेसूंभी पुष्टि और अन्य मार्गनको ऐक्य नहीं है।१०।

'तानहं द्विपतो' वाक्याद्भिन्ना जीवाः प्रवाहिणः।
अत एवेतरौ भिन्नौ सान्तौ मोक्षप्रवेशतः। ११।

अन्वय—'तानहं द्विपतो' वाक्यात् प्रवाहिणः जीवाः भिन्नाः (सन्ति), अत एव भिन्नौ इतरौ, मोक्षप्रवेशतः सान्तौ (स्तः)।

भावार्थ—'मैं जगत्रूप ब्रह्मसूं द्वेपकरनवारे उन आसुर जीवनकूं वारंवार आसुरयोनिनमेंही डारूं हूं' या श्रीकृष्णके वाक्यसूं प्रवाहमार्गीय जीव भिन्न हैं ऐसो निश्चय होय है, ताहीसूं प्रवाहीनसूं जुदे मर्यादामार्गीय और पुष्टिमार्गीय जीव, अक्षरैक्य और हरिप्राप्तिके होयवेसूं अंत वारे हैं, अर्थात् इन दोनोनको जीवभाव मिट जाय है, और प्रवाहीनकूं सदा संसारचक्रमेंही रहनो पडे है।

कठिन समास—मोक्षश्च प्रवेशश्च मोक्षप्रवेशौ, मोक्षप्रवेशाभ्यां इति मोक्षप्रवेशतः। अन्तेन सहितौ सान्तौ। ११।

तस्माज्जीवाः पुष्टिमार्गे भिन्ना एव न संशयः।
भगवद्रूपसेवार्थं तत्सृष्टिर्नान्यथा भवेत्। १२।

अन्वय—तस्मात् पुष्टिमार्गे जीवाः भिन्ना एव संशयः न (अस्ति), तत्सृष्टिः भगवद्रूपसेवार्थं (अस्ति), अन्यथा न भवेत्।

भावार्थ—पूर्वमें तीनोंमार्ग जुदे २ कहे हैं तासूं पुष्टिमार्गमें जीव दोनों मार्गनके जीवनसूं जुदेही हैं, यामें अणुमात्रभी सन्देह नहीं है, उनपुष्टिमार्गीयजीवनकी सृष्टि भगवान्की स्वरूपसेवाके लिये है, अन्यके लिये उनकी सृष्टि होय यह संभव नहीं है।

कठि० समास—भगवतः रूपं भगवद्रूपं, तस्य सेवा भगवद्रूपसेवा, तस्यै इति भगवद्रूपसेवार्थम्। १२।

स्वरूपेणावतारेण लिंगेन च गुणेन च ।
तारतम्यं न स्वरूपे देहे वा तत्क्रियासु वा । १३ ।
तथापि यावता कार्यं तावत्तस्य करोति हि ।

अन्वय—स्वरूपेण अवतारेण लिंगेन च गुणेन च (पुष्टिजीवानां) स्वरूपे वा देहे वा तत्क्रियासु तारतम्यं न (अस्ति), तथापि यावता कार्यं तावत् तस्य करोति हि ।

